चौखम्बा स्तोत्र ग्रन्थमाला

२१

# श्रीसुब्रह्मण्यसहस्रनामस्तोत्रम्

(नामावलिसंवलितम्)

चौखम्बा संस्कृत प्रतिष्ठान : दिल्ली

मूल्य १५.००

॥श्रीः॥

२१

# श्रीसुब्रह्मण्यसहस्रनामस्तोत्रम्

## नामावलिसंवलितम्

चौखम्बा संस्कृत प्रतिष्ठान
३८ यू ए बंगलो रोड, जवाहर नगर
दिल्ली ११०००७

मूल्य १५००

अन्य प्राप्ति स्थान:
चौखम्बा सुरभारती प्रकाशन
के० ३७/११७, गोपाल मन्दिर लेन
पो० बा० नं० ११२९, वाराणसी २२१००१

चौखम्बा विद्याभवन
चौक ( बनारस स्टेट बैंक भवन के पीछे )
पो० बा० नं० १०६९, वाराणसी २२१००१

## ॥ श्रीसुब्रह्मण्यसहस्रनामस्तोत्रम् ॥

ऋषय ऊचुः—

सर्वशास्त्रार्थतत्त्वज्ञ सर्वलोकोपकारक ।
वयं चातिथयः प्राप्ता आतिथेयोऽसि सुव्रत ॥ १ ॥
ज्ञानदानेन संसारसागरात्तारयस्व नः ।
कलौ कलुषचित्ता ये नराः पापरताः सदा ॥ २ ॥
केन स्तोत्रेण मुच्यन्ते सर्वपातकबन्धनैः ।
इष्टसिद्धिकरं पुण्यं दुःखदारिद्र्यनाशनम् ॥ ३ ॥
सर्वरोगहरं स्तोत्रं सूत नो वक्तुमर्हसि ।

श्रीसूत उवाच—



शृणुध्वमृषयः सर्वे नैमिषारण्यवासिनः ॥ ४ ॥

तत्त्वज्ञानतपोनिष्ठाः सर्वशास्त्रविशारदाः ।
स्वयंभुवा पुरा प्रोक्तं नारदाय महात्मने ॥ ५ ॥
तदहं संप्रवक्ष्यामि श्रोतुं कौतूहलं यदि ।

ऋषय ऊचुः—

किमाह भगवान्ब्रह्मा नारदाय महात्मने ॥ ६ ॥
सूतपुत्र महाभाग वक्तुमर्हसि सांप्रतम् ।

श्रीसूत उवाच —

दिव्यसिह्मासनासीनं सर्वदेवैरभिष्टुतम् ॥७ ॥
साष्टाङ्गप्रणिपत्यैनं ब्रह्माणं भुवनेश्वरम् ।

नारदः परिपप्रच्छ कृताञ्जलिरुपस्थितः ॥ ८ ॥

नारद उवाच–

लोकनाथ सुरश्रेष्ठ सर्वज्ञकरुणाकर ।
षण्मुखस्य परं स्तोत्रं पावनं पापनाशनम् ॥ ९ ॥
धातस्त्वं पुत्रवात्सल्यात्तद्वद प्रणताय मे ।
उपदिश्य तु मां देव रक्ष रक्ष कृपानिधे ॥ १० ॥

बह्मा उवाच–

शृणु वक्ष्यामि देवर्षे स्तवराजमिमं परम् ।
मातृकामालिकायुक्तं ज्ञानमोक्षसुखप्रदम् ॥ ११ ॥
सहस्त्राणि च नामानि षण्मुखस्य महात्मनः ।
यानि नामानि दिव्यानि दुःखरोगहराणि च ॥ १२ ॥

तानि नामानि वक्ष्यामि कृपया त्वयि नारद ।
जपमात्रेण सिध्यन्ति मनसा चिन्तितान्यपि ॥ १३ ॥
इहामुत्रं परं भोगं लभते नात्र संशयः ।
इदं स्तोत्रं परं पुण्यं कोटियज्ञफलप्रदम् ।
सन्देहो नात्र कर्तव्यः शृणु मे निश्चितं वचः ॥ १४ ॥

ॐ अस्य श्रीसुब्रह्मण्यसहस्रनामस्तोत्रमहामन्त्रस्य ब्रह्मा ऋषिः । अनुष्टुप्छन्दः । सुब्रह्मण्यो देवता ।शरजन्माक्षय इति बीजम् । शक्तिधरोऽक्षय इति शक्तिः । कार्तिकेय इति कीलकम् । क्रौंचंभेदीत्यर्गलम् ।शिखिवाहन इति कवचम् ।षण्मुख इति ध्यानम् । श्रीसुब्रह्मण्यप्रसादसिद्ध्यर्थे जपे विनियोगः ।

ॐ शं ॐकारस्वरूपाय ओजोधराय ओजस्विने सुहृदयाय

हृष्टचित्तात्मने भास्वररूपाय अङ्गुठाभ्यां नमः। ॐ रं षट्कोणमध्यनिलयाय षट्किरीटधराय श्रीमते षडाधाराय तर्जनीभ्यां नमः। ॐ वं षण्मुखाय शरजन्मने शुभलक्षणाय शिखिवाहनाय मध्यमाभ्यां नमः। ॐ णं कृशानुसंभवाय कवचिने कुक्कुटध्वजाय अनामिकाभ्यां नमः। ॐ भं कन्दर्पकोटिदीप्यमानाय द्विषड्वाहवे द्वादशाक्षाय कनिष्ठिकाभ्यां नमः। ॐ वं खेटधराय खड्गिने शक्तिहस्ताय करतलकरपृष्ठाभ्यां नमः ।

ॐ शं ॐकारस्वरूपाय ओजोधराय ओजस्विने सुहृदयाय हृष्टचित्तात्मने भास्वररूपाय हृदयाय नमः । ॐ रं षट्कोणमध्यनिलयाय षट्किरीटधराय श्रीमते षडाधाराय शिरसे स्वाहा । ॐ वं षण्मुखाय शरजन्मने शुभलक्षणाय शिखिवाहनाय शिखायै वषट् । ॐ णं कृशानुसंभवाय कवचिने कुक्कुटध्वजाय कवचाय हुं । ॐ भं कन्दर्पकोटिदीप्यमानाय द्विषड्बाहवे द्वादशायाय नेत्रत्रयाय वौषट् । ॐ वं खेटधराय खड्गिने शक्तिहस्ताय अस्त्राय फट् । भूर्भुवस्सुवरोमिति दिग्बन्धः ।

ध्यानम् –

ध्यायेत्षण्मुखमिन्दुकोटिसदृशं रत्नप्रभाशोभितम्।
बालार्कद्युतिषट्किरीटविलसत्केयूरहारान्वितम् ॥ १ ॥
कर्णालम्बितकुण्डलप्रविलसद्गण्डस्थलाशोभितम्।
काञ्चीकङ्कणकिंकिणीरवयुतं शृङ्गाररसारोदयम् ॥ २ ॥
ध्यायेदीप्सितसिद्धिदं शिवसुतं श्रीद्वादशाक्षं गुहम्।
खेटं कुक्कुटमंकुशं च वरदं पाशं धनुश्चक्रकम् ॥ ३ ॥
वज्रं शक्तिमसिं च शूलमभयं दोर्भिर्धृतं षण्मुखम्।
देवं चित्रमयूरवाहनगतं चित्राम्बरालंकृतम् ॥ ४ ॥

## ॥ सुब्रह्मण्यसहस्रनामस्तोत्रम् ॥

अचिन्त्यशक्तिरनघस्त्वक्षोभ्यस्त्वपराजितः ।
अनाथवत्सलोऽमोघस्त्वशोकोऽप्यजरोऽभयः ॥ १ ॥
अत्युदारो ह्यघहरस्त्वग्रगण्योऽद्रिजासुतः ।
अनन्तमहिमाऽपारोऽनन्तसौख्यप्रदोऽव्ययः ॥२ ॥
अनन्तमोक्षदोऽनादिरप्रमेयोऽक्षरोऽच्युतः ।
अकल्मषोऽभिरामोऽग्रधुर्यश्चामितविक्रमः ॥३ ॥
अनाथनाथो ह्यमलो ह्यप्रमत्तोऽमरप्रभुः ।
अरिन्दमोऽखिलाधारस्त्वणिमादिगुणोऽग्रणीः ॥४ ॥

अचञ्चलोऽमरस्तुत्यो ह्यकलङ्कोऽमिताशनः ।

अग्निभूरनवद्याङ्गो ह्यद्भुतोऽभीष्टदायकः ।
अतीन्द्रियोऽप्रमेयात्मा ह्यदृश्योऽव्यक्तलक्षणः ।
आपद्विनाशकस्त्वार्य आढ्य आगमसंस्तुतः ॥ ६ ॥
आर्तसंरक्षणस्त्वाद्य आनन्दस्त्वार्यसेवितः ।
आश्रितेष्टार्थवरद आनन्द्यार्तफलप्रदः ॥ ७ ॥
आश्चर्यरूप आनन्द आपन्नार्तिविनाशनः ।
इभवक्त्रानुजस्त्विष्ट इभासुरहरात्मजः ॥ ८ ॥
इतिहासश्रुतिस्तुत्य इन्द्रभोगफ़लप्रदः ।
इष्टापूर्तफलप्राप्तिरिष्टेष्टवरदायकः ॥ ९ ॥

इहामुत्रेष्टफलद इष्टदस्त्विन्द्रवन्दितः ।
ईडनीयस्त्वीशपुत्र ईप्सितार्थप्रदायकः ॥ १० ॥
ईतिभीतिहरश्चेड्य ईषणात्रयवर्जितः ।
उदारकीर्तिरुद्योगी चोत्कृष्टोरुपराक्रमः ॥ ११ ॥
उत्कृष्टशक्तिरुत्साह उदारश्चोत्सवप्रियः ।
उज्जृम्भ उद्भवश्चोग्र उदग्रश्चोग्रलोचनः ॥ १२ ॥
उन्मत्त उग्रशमन उद्वेगघ्नोरगेश्वरः ।
उरुप्रभावश्चोदीर्ण उमापुत्र उदारधीः ॥ १३ ॥
ऊर्ध्वरेतःसुतस्तूर्ध्वगतिदस्तूर्जपालकः ।
ऊर्जितस्तूर्ध्वगस्तूर्ध्व ऊर्ध्वलोकैकनायकः ॥ १४ ॥

ऊर्जिवानूर्जितोदार ऊर्जितोर्जितशासनः ।
ऋषिदेवगणस्तुत्य ऋणत्रयविमोचनः ॥ १५ ॥
ऋजुरूपो ह्यृजुकर ऋजुमार्गप्रदर्शनः ।
ऋतंभरो ह्यृजुप्रीत ऋषभस्त्वृद्धिदस्त्वृतः ॥१६ ॥
लुलितोद्धारको लूतभवपाशप्रभञ्जनः ।
एणाङ्कधरसत्पुत्र एक एनोविनाशनः ॥ १७ ॥
ऐश्वर्यदश्चैन्द्रभोगी चैतिह्यश्चैन्द्रवन्दितः ।
ओजस्वी चौषधिस्थानमोजोदश्चौदनप्रदः ॥ १८ ॥
औदार्यशील औमेय औग्र औन्नत्यदायकः ।

औदार्य औषधकर औषधं चौषधाकरः ॥ १९ ॥
अंशुमाल्यंशुमालीड्य अम्बिकातनयोऽन्नदः ।
अन्धकारिसुतोऽन्धत्वहारी चाम्बुजलोचनः ॥ २० ॥
अस्तमायोऽमराधीशो ह्यस्पष्टोऽस्तोकपुण्यदः ।
अस्तामित्रोऽस्तरूपश्चास्खलत्सुगतिदायकः ॥ २१ ॥
कार्तिकेयः कामरूपः कुमारः क्रौञ्चदारणः ।
कामदः कारणं काम्यः कमनीयः कृपाकरः ॥ २२ ॥
काञ्चनाभः कान्तियुक्तः कामी कामप्रदः कविः ।
कीर्तिकृत्कुक्कुटधरः कूटस्थः कुवलेक्षणः ॥ २३ ॥

कुङ्कुमाङ्गः क्लमहरः कुशलः कुक्कुटध्वजः ।

कुशानुसंभवः क्रूरः क्रूरघ्नः कलितापहृत् ॥ २४ ॥
कामरूपः कल्पतरुः कान्तः कामितदायकः ।
कल्याणकृत्क्लेशनाशः कृपालुः करुणाकरः ॥ २५ ॥
कलुषघ्नः क्रियाशक्तिः कठोरः कवची कृती ।
कोमलाङ्गः कुशप्रीतः कुत्सितघ्नः कलाधरः ॥ २६ ॥
ख्यातः खेटधरः खड्गी खट्वाङ्गी खलनिग्रहः ।
ख्यातिप्रदः खेचरेशः ख्यातेहः खेचरस्तुतः ॥ २७ ॥
खरतापहरः स्वस्थः खेचरः खेचराश्रयः ।
खण्डेन्दुमौलितनयः खेलः खेचरपालकः ॥ २८ ॥

खस्थलः खण्डितार्कश्च खेचरीजनपूजितः ।
गाङ्गेयो गिरिजापुत्रो गणनाथानुजो गुहः ॥ २९ ॥
गोप्ता गीर्वाणसंसेव्यो गुणातीतो गुहाश्रयः ।
गतिप्रदो गुणनिधिः गम्भीरो गिरिजात्मजः ॥ ३० ॥
गूढरूपो गदहरो गुणाधीशो गुणाग्रणीः ।
गोधरो गहनो गुप्तो गर्वघ्नो गुणवर्धनः ॥३१ ॥
गुह्यो गुणज्ञो गीतिज्ञो गतातङ्को गुणाश्रयः ।
गद्यपद्यप्रियो गुण्यो गोस्तुतो गगनेचरः ॥ ३२ ॥
गणनीयचरित्रश्च गतक्लेशो गुणार्णवः ।

घूर्णिताक्षो घृणिनिधिः घनगम्भीरघोषणः ॥३३ ॥

घण्टानादप्रियो घोषो घोराघौघविनाशनः ।
घनानन्दो घर्महन्ता घृणावान् घृष्टिपातकः ॥३४ ॥
घृणी घृणाकरो घोरो घोरदैत्यप्रहारकः ।
घटितैश्वर्यसंदोहो घनार्थो घनसंक्रमः ॥३५ ॥
चित्रकृच्चित्रवर्णश्च चञ्चलश्चपलद्युतिः ।
चिन्मयश्चित्स्वरूपश्च चिरानन्दश्चिरंतनः ॥ ३६ ॥
चित्रकेलिश्चित्रतरश्चिन्तनीयश्चमत्कृतिः ।
चोरघ्नश्चतुरश्चारुश्चामीकरविभूषणः ॥३७ ॥
चन्द्रार्ककोटिसदृशश्चन्द्रमौलितनूभवः ।

छादिताङ्गश्छद्महन्ता छेदिताखिलपातकः ॥ ३८ ॥
छेदीकृततमःक्लेशश्छत्रीकृतमहायशाः ।
छादिताशेषसंतापश्छरितामृतसागरः ॥ ३९ ॥
छन्नत्रैगुण्यरूपश्च छातेहश्छिन्नसंशयः ।
छन्दोमयश्छन्दगामी छिन्नपाशश्छविश्छदः ॥ ४० ॥
जगद्धितो जगत्पूज्यो जगज्ज्येष्ठो जगन्मयः ।
जनको जाह्नवीसूनुर्जितामित्रो जगद्गुरुः ॥ ४१ ॥
जयी जितेन्द्रियो जैत्रो जरामरणवर्जितः ।
ज्योतिर्मयो जगन्नाथो जगज्जीवो जनाश्रयः ॥ ४२ ॥

जगत्सेव्यो जगत्कर्ता जगत्साक्षी जगत्प्रियः ।

जम्भारिवन्द्यो जयदो जगज्जनमनोहरः ॥ ४३ ॥
जगदानन्दजनको जनजाड्यापहारकः ।
जपाकुसुमसंकाशो जनलोचनशोभनः ॥ ४४ ॥
जनेश्वरो जितक्रोधो जनजन्मनिबर्हणः ।
जयदो जन्तुतापघ्नो जितदैत्यमहाव्रजः ॥४५ ॥
जितमायो जितक्रोधो जितसङ्गो जनप्रियः ।
झंझानिलमहावेगो झरिताशेषपातकः ॥ ४६ ॥
झर्झरीकृतदैत्यौघो झल्लरीवाद्यसंप्रियः ।
ज्ञानमूर्तिर्ज्ञानगम्यो ज्ञानी ज्ञानमहानिधिः ॥ ४७ ॥

टंकारनृत्तविभवः टंकवज्रध्वजाङ्कितः ।
टंकिताखिललोकश्च टंकितैनस्तमोरविः ॥ ४८ ॥
डम्बरप्रभवो डम्भो डम्बो डमरूकप्रियः ।
डमरोत्कटसन्नादो डिंभरूपस्वरूपकः ॥ ४९ ॥
ढक्कानादप्रीतिकरो ढालितासुरसंकुलः ।
ढौकितामरसंदोहो ढुण्डिविघ्नेश्वरानुजः ॥ ५० ॥
तत्त्वज्ञस्तत्वगस्तीव्रस्तपोरूपस्तपोमयः ।
त्रयीमयस्त्रिकालज्ञस्त्रिमूर्तिस्त्रिगुणात्मकः ॥५१ ॥
त्रिदशेशस्तारकारिस्तापघ्नस्तापसप्रियः ।

तुष्टिदस्तुष्टिकृत्तीक्ष्णस्तपोरूपस्त्रिकालवित् ॥ ५२ ॥

स्तोता स्तव्यः स्तवप्रीतः स्तुतिः स्तोत्रं स्तुतिप्रियः ।
स्थितः स्थायी स्थापकश्च स्थूलसूक्ष्मप्रदर्शकः ॥५३ ॥
स्थविष्ठः स्थविरः स्थूलः स्थानदः स्थैर्यदः स्थिरः ।
दान्तो दयापरो दाता दुरितघ्नो दुरासदः ॥ ५४ ॥
दर्शनीयो दयासारो देवदेवो दयानिधिः ।
दुराधर्षो दुर्विगाह्यो दक्षो दर्पणशोभितः ॥ ५५ ॥
दुर्धरो दानशीलश्च द्वादशाक्षो द्विषड्भुजः ।
द्विषट्कर्णो द्विषड्बाहुर्दीनसंतापनाशनः ॥ ५६ ॥



दन्दशूकेश्वरो देवो दिव्यो दिव्याकृतिर्दमः ।

दीर्घवृत्तो दीर्घबाहुर्दीर्घदृष्टिर्दिवस्पतिः ॥५७ ॥
दण्डो दमयिता दर्पो देवसिंहो दृढव्रतः ।
दुर्लभो दुर्गमो दीप्तो दुष्प्रेक्ष्यो दिव्यमण्डनः ॥ ५८ ॥
दुरोदरघ्नो दुःखघ्नो दुरारिघ्नो दिशांपतिः ।
दुर्जयो देवसेनेशो दुर्ज्ञेयो दुरतिक्रमः ॥५९ ॥
दम्भो दृप्तश्च देवर्षिर्दैवज्ञो दैवचिन्तकः ।
धुरंधरो धर्मपरो धनदो धृतिवर्धनः ॥ ६० ॥
धर्मेशो धर्मशास्त्रज्ञो धन्वी धर्मपरायणः ।
धनाध्यक्षो धनपतिर्धृतिमान्धूतकिल्बिषः ॥ ६१ ॥

धर्महेतुर्धर्मशूरो धर्मकृद्धर्मविद्ध्रुवः ।

धाता श्रीमान्धर्मचारी धन्यो धुर्यो धृतव्रतः ॥ ६२ ॥
नित्योत्सवो नित्यतृप्तो निर्लेपो निश्चलात्मकः ।
निरवद्यो निराधारो निष्कलङ्को निरञ्जनः ॥ ६३ ॥
निर्ममो निरहंकारो निर्मोहो निरुपद्रवः ।
नित्यानन्दो निरातङ्को निष्प्रपञ्चो निरामयः ॥ ६४ ॥
निरवद्यो निरीहश्च निर्दर्शो निर्मलात्मकः ।
नित्यानन्दो निर्जरेशो निःसङ्गो निगमस्तुतः ॥ ६५ ॥
निष्कण्टको निरालम्बो निष्प्रत्यूहो निरुद्भवः ।
नित्यो नियतकल्याणो निर्विकल्पो निराश्रयः ॥ ६६ ॥

नेता निधिर्नैकरूपो निराकारो नदीसुतः ।
पुलिन्दकन्यारमणः पुरुजित्परमप्रियः ॥ ६७ ॥
प्रत्यक्षमूर्तिः प्रत्यक्षः परेशः पूर्णपुण्यदः ।
पुण्याकरः पुण्यरूपः पुण्यः पुण्यपरायणः ॥ ६८ ॥
पुण्योदयः परं ज्योतिः पुण्यकृत्पुण्यवर्धनः ।
परानन्दः परतरः पुण्यकीर्तिः पुरातनः ॥ ६९ ॥
प्रसन्नरूपः प्राणेशः पन्नगः पापनाशनः ।
प्रणतार्तिहरः पूर्णः पार्वतीनन्दनः प्रभुः ॥ ७० ॥
पूतात्मा पुरुषः प्राणः प्रभवः पुरुषोत्तमः ।

प्रसन्नः परमस्पष्टः परः परिवृढः परः ॥ ७१ ॥

परमात्मा परब्रह्म परार्थः प्रियदर्शनः ।
पवित्रः पुष्टिदः पूर्तिः पिङ्गलः पुष्टिवर्धनः ॥७२ ॥
पापहारी पाशधरः प्रमत्तासुरशिक्षकः ।
पावनः पावकः पूज्यः पूर्णानन्दः परात्परः ॥ ७३ ॥
पुष्कलः प्रवरः पूर्वः पितृभक्तः पुरोगमः ।
प्राणदः प्राणिजनकः प्रदिष्टः पावकोद्भवः ॥ ७४ ॥
परब्रह्मस्वरूपश्च परमैश्वर्यकारणम् ।
परर्द्धिदः पुष्टिकरः प्रकाशात्मा प्रतापवान् ॥ ७५ ॥

प्रज्ञापरः प्रकृष्टार्थः पृथुः पृथुपराक्रमः ।

फणीश्वरः फणिवरः फणामणिविभूषणः ॥ ७६ ॥
फलदः फलहस्तश्च फुल्लाम्बुजविलोचनः ।
फडुच्चाटितपापौघः फणिलोकविभूषणः ॥ ७७ ॥
बाहुलेयो बृहद्रूपो बलिष्ठो बलवान् बली ।
ब्रह्मेशविष्णुरूपश्च बुद्धो बुद्धिमतां वरः ॥ ७८ ॥
बालरूपो ब्रह्मगर्भो ब्रह्मचारी बुधप्रियः ।
बहुश्रुतो बहुमतो ब्रह्मण्यो ब्राह्मणप्रियः ॥ ७९ ॥
बलप्रमथनो ब्रह्मा बहुरूपो बहुप्रदः ।
बृहद्भानुतनूद्भूतो बृहत्सेनो बिलेशयः ॥ ८० ॥

बहुबाहुर्बलश्रीमान् बहुदैत्यविनाशकः ।

बिलद्वारान्तरालस्थो बृहच्छक्तिधनुर्धरः ॥ ८१ ॥
बालार्कद्युतिमान् बालो बृहद्वक्षा बृहद्धनुः ।
भव्यो भोगीश्वरो भाव्यो भवनाशो भवप्रियः ॥ ८२ ॥
भक्तिगम्यो भयहरो भावज्ञो भक्तसुप्रियः ।
भुक्तिमुक्तिप्रदो भोगी भगवान् भाग्यवर्धनः ॥ ८३ ॥
भ्राजिष्णुर्भावनो भर्ता भीमो भीमपराक्रमः ।
भूतिदो भूतिकृद्भोक्ता भूतात्मा भुवनेश्वरः ॥ ८४ ॥
भावको भीकरो भीष्मो भावकेष्टो भवोद्भवः ।
भवतापप्रशमनो भोगवान् भूतभावनः ॥ ८५ ॥

भोज्यप्रदो भ्रान्तिनाशो भानुमान् भुवनाश्रयः ।
भूरिभोगप्रदो भद्रो भजनीयो भिषग्वरः ॥ ८६ ॥
महासेनो महोदारो महाशक्तिर्महाद्युतिः ।
महाबुद्धिर्महावीर्यो महोत्साहो महाबलः ॥ ८७ ॥
महाभोगी महामायी मेधावी मेखली महान् ।
मुनिस्तुतो महामान्यो महानन्दो महायशाः ॥ ८८ ॥
महोर्जितो माननिधिर्मनोरथफलप्रदः ।
महोदयो महापुण्यो महाबलपराक्रमः ॥ ८९ ॥
मानदो मतिदो माली मुक्तामालाविभूषणः ।

मनोहरो महामुख्यो महर्द्धिर्मूर्तिमान्मुनिः ॥ ९० ॥

महोत्तमो महोपायो मोक्षदो मङ्गलप्रदः ।
मुदाकरो मुक्तिदाता महाभोगो महोरगः ॥९१ ॥
यशस्करो योगयोनिर्योगिष्ठो यमिनां वरः ।
यशस्वी योगपुरुषो योग्यो योगनिधिर्यमी ॥ ९२ ॥
यतिसेव्यो योगयुक्तो योगविद्योगसिद्धिदः ।
यन्त्रो यन्त्री च यन्त्रज्ञो यन्त्रवान्यन्त्रवाहकः ॥ ९३ ॥
यातनारहितो योगी योगीशो योगिनां वरः ।
रमणीयो रम्यरूपो रसज्ञो रसभावनः ॥ ९४ ॥
रञ्जनो रञ्जितो रागी रुचिरो रुद्रसंभवः ।

रणप्रियो रणोदारो रागद्वेषविनाशनः ॥ ९५ ॥
रत्नार्ची रुचिरो रम्यो रूपलावण्यविग्रहः ।
रत्नाङ्गदधरो रत्नभूषणो रमणीयकः ॥ ९६ ॥
रुचिकृद्रोचमानश्च रञ्जितो रोगनाशनः ।
राजीवाक्षो राजराजो रक्तमाल्यानुलेपनः ॥ ९७ ॥
राजद्वेदागमस्तुत्यो रजःसत्त्वगुणान्वितः ।
रजनीशकलारम्यो रत्नकुण्डलमण्डितः ॥९८ ॥
रत्नसन्मौलिशोभाढ्यो रणन्मञ्जीरभूषणः ।
लोकैकनाथो लोकेशो ललितो लोकनायकः ॥ ९९ ॥
लोकरक्षी लोकशिक्षी लोकलोचनरञ्जितः ।

लोकबन्धुर्लोकधाता लोकत्रयमहाहितः ॥ १०० ॥
लोकचूडामणिर्लोकवन्द्यो लावण्यविग्रहः ।
लोकाध्यक्षस्तु लीलावान्लोकोत्तरगुणान्वितः ॥ १०१ ॥
वरिष्ठो वरदो वैद्यो विशिष्टो विक्रमो विभुः ।
विबुधाग्रचरो वश्यो विकल्पपरिवर्जितः ॥ १०२ ॥
विपाशो विगतातङ्को विचित्राङ्गो विरोचनः ।
विद्याधरो विशुद्धात्मा वेदाङ्गो विबुधप्रियः ॥ १०३ ॥
वचस्करो व्यापकश्च विज्ञानी विनयान्वितः ।
विद्वत्तमो विरोधिघ्नो वीरो विगतरागवान् ॥ १०४ ॥

वीतभावो विनीतात्मा वेदगर्भो वसुप्रदः ।
विश्वदीप्तिर्विशालाक्षो विजितात्मा विभावनः ॥ १०५ ॥
वेदवेद्यो विधेयात्मा वीतदोषश्च वेदवित् ।
विश्वकर्मा वीतभयो वागीशो वासवार्चितः ॥ १०६ ॥
वीरध्वंसो विश्वमूर्तिर्विश्वरूपो वरासनः ।
विशाखो विमलो वाग्मी विद्वान्वेदधरो वटुः ॥ १०७ ॥
वीरचूडामणिर्वीरो विद्येशो विबुधाश्रयः ।
विजयी विनयी वेत्ता वरीयान्विरजा वसुः ॥ १०८ ॥
वीरघ्नो विज्वरो वेद्यो वेगवान्वीर्यवान्वशी ।
वरशीलो वरगुणो विशोको वज्रधारकः ॥ १०९ ॥

शरजन्मा शक्तिधरः शत्रुघ्नः शिखिवाहनः ।
श्रीमान्शिष्टः शुचिः शुद्धः शाश्वतो श्रुतिसागरः ॥ ११० ॥
शरण्यः शुभदः शर्म शिष्टेष्टः शुभलक्षणः ।
शान्तः शूलधरः श्रेष्ठः शुद्धात्मा शङ्करः शिवः ॥ १११ ॥
शितिकण्ठात्मजः शूरः शान्तिदः शोकनाशनः ।
षाण्मातुरः षण्मुखश्च षड्गुणैश्वर्यसंयुतः ॥ ११२ ॥
षट्चक्रस्थः षडूर्मिघ्नः षडङ्गश्रुतिपारगः ।
षड्भावरहितः षट्कः षट्शास्त्रस्मृतिपारगः ॥११३ ॥
षड्वर्गदाता षड्ग्रीवः षडरिघ्नः षडाश्रयः ।

षट्किरीटधरः श्रीमान् षडाधारश्च षट्क्रमः ॥ ११४ ॥
षट्कोणमध्यनिलयः षण्डत्वपरिहारकः ।
सेनानीः सुभगः स्कन्दः सुरानन्दः सतां गतिः ॥ ११५ ॥
सुब्रह्मण्यः सुराध्यक्षः सर्वज्ञः सर्वदः सुखी ।
सुलभः सिद्धिदः सौम्यः सिद्धेशः सिद्धिसाधनः ॥ ११६ ॥
सिद्धार्थः सिद्धसंकल्पः सिद्धसाधुः सुरेश्वरः ।
सुभुजः सर्वदृक्साक्षी सुप्रसादः सनातनः ॥ ११७ ॥
सुधापतिः स्वयंज्योतिः स्वयंभूः सर्वतोमुखः ।
समर्थः सत्कृतिः सूक्ष्मः सुघोषः सुखदः सुहृत् ॥ ११८ ॥
सुप्रसन्नः सुरश्रेष्ठः सुशीलः सत्यसाधकः ।

संभाव्यः सुमनाः सेव्यः सकलागमपारगः ॥ ११९ ॥
सुव्यक्तः सच्चिदानन्दः सुवीरः सुजनाश्रयः ।
सर्वलक्षणसंपन्नः सत्यधर्मपरायणः ॥ १२० ॥
सर्वदेवमयः सत्यः सदा मृष्टान्नदायकः ।
सुधापी सुमतिः सत्यः सर्वविघ्नविनाशनः ॥ १२१ ॥
सर्वदुःखप्रशमनः सुकुमारः सुलोचनः ।
सुग्रीवः सुधृतिः सारः सुराराध्यः सुविक्रमः ॥ १२२ ॥
सुरारिघ्नः स्वर्णवर्णः सर्पराजः सदा शुचिः ।
सप्तार्चिर्भूः सुरवरः सर्वायुधविशारदः ॥ १२३ ॥

हस्तिचर्माम्बरसुतो हस्तिवाहनसेवितः ।
हस्तचित्रायुधधरो हृताघो हसिताननः ॥ १२४ ॥
हेमभूषो हरिद्वर्णो हृष्टिदो हृष्टिवर्धनः ।
हेमाद्रिभिद्धंसरूपो हुंकारहतकिल्विषः ॥१२५ ॥
हिमाद्रिजातातनुजो हरिकेशो हिरण्मयः ।
हृद्यो हृष्टो हरिसखो हंसो हंसगतिर्हविः ॥ १२६ ॥
हिरण्यवर्णो हितकृद्धर्षदो हेमभूषणः ।
हरप्रियो हितकरो हतपापो हरोद्भवः ॥१२७ ॥
क्षेमदः क्षेमकृत्क्षेम्यः क्षेत्रज्ञः क्षामवर्जितः ।
क्षेत्रपालः क्षमाधारः क्षेमक्षेत्रः क्षमाकरः ॥१२८ ॥

क्षुद्रघ्नः क्षान्तिदः क्षेमः क्षितिभूषः क्षमाश्रयः ।
क्षालिताघः क्षितिधरः क्षीणसंरक्षणक्षमः ॥ १२९ ॥
क्षणभङ्गुरसन्नद्धघनशोभिकपर्दकः ।
क्षितिभृन्नाथतनयामुखपङ्कजभास्करः ॥ १३० ॥
क्षताहितः क्षरः क्षन्ता क्षतदोषः क्षमानिधिः ।
क्षपिताखिलसंतापः क्षपानाथसमाननः ॥१३१ ॥

---

इति नाम्नां सहस्राणि षण्मुखस्य च नारद ।
यः पठेच्छृणुयाद्वापि भक्तियुक्तेन चेतसा ॥१ ॥
स सद्यो मुच्यते पापैर्मनोवाक्कायसंभवैः ।
आयुर्वृद्धिकरं पुंसां स्थैर्यवीर्यविवर्धनम् ॥ २ ॥
वाक्येनैकेन वक्ष्यामि वाञ्छितार्थं प्रयच्छति ।
तस्मात्सर्वात्मना ब्रह्मन्नियमेन जपेत्सुधीः ॥ ३ ॥

॥ इति श्रीस्कान्दे महापुराणे ईश्वरप्रोक्ते ब्रह्मनारदसंवादे
षण्मुखसहस्रनामस्तोत्रं संपूर्णम् ॥

## ।। सुब्रह्मण्यसहस्त्रनामस्तोत्रनामावलिः ।।

ॐ अचिन्त्यशक्तये नमः
ॐ अनघाय नमः ।
ॐ अक्षोभ्याय नमः ।
ॐ अपराजिताय नमः ।
ॐ अनाथवत्सलाय नमः ।
ॐ अमोघाय नमः ।
ॐ अशोकाय नमः ।
ॐ अजराय नमः ।
ॐ अभयाय नमः ।
ॐ अत्युदाराय नमः ।१०
ॐ अघहराय नमः ।
ॐ अग्रगण्याय नमः ।
ॐ अद्रिजासुताय नमः ।
ॐ अनन्तमहिम्ने नमः ।
ॐ अपाराय नमः ।
ॐ अनन्तसौख्यप्रदाय नमः ।
ॐ अव्ययाय नमः ।
ॐ अनन्तमोक्षदाय नमः ।

ॐ अनादये नमः ।
ॐ अप्रमेयाय नमः । २०
ॐ अक्षराय नमः ।
ॐ अच्युताय नमः ।
ॐ अकल्मषाय नमः ।
ॐ अभिरामाय नमः ।
ॐ अग्रधुर्याय नमः ।
ॐ अमितविक्रमाय नमः ।
ॐ अनाथनाथाय नमः ।
ॐ अमलाय नमः ।
ॐ अप्रमत्ताय नमः ।
ॐअमरप्रभवे नमः ।३०
ॐ अरिन्दमाय नमः ।
ॐ अखिलाधाराय नमः ।
ॐ अणिमादिगुणाय नमः
ॐ अग्रण्ये नमः ।
ॐ अचञ्चलाय नमः ।
ॐ अमरस्तुत्याय नमः ।
ॐ अकलङ्काय नमः ।
ॐ अमिताशनाय नमः ।

ॐ अग्निभुवे नमः ।
ॐ अनवद्याङ्गाय नमः । ४०
ॐ अद्भुताय नमः ।
ॐ अभीष्टदायकाय नमः ।
ॐ अतीन्द्रियाय नमः ।
ॐ अप्रमेयात्मने नमः ।
ॐ अदृश्याय नमः ।
ॐ अव्यक्तलक्षणाय नमः ।
ॐ आपद्विनाशकाय नमः ।
ॐ आर्याय नमः ।
ॐ आढ्याय नमः ।
ॐ आगमसंस्तुताय नमः । ५०
ॐ आर्तसंरक्षणाय नमः ।
ॐ आद्याय नमः ।
ॐ आनन्दाय नमः ।
ॐ आर्यसेविताय नमः ।
ॐ आश्रितेष्टार्थवरदाय नमः ।
ॐ आनन्दिने नमः ।

ॐ आर्तफलप्रदाय नमः ।
ॐ आश्चर्यरूपाय नमः ।
ॐ आनन्दाय नमः ।
ॐ आपन्नार्तिविनाशनाय नमः ।६०
ॐ इभवक्त्रानुजाय नमः ।
ॐ इष्टाय नमः ।
ॐ भभासुरहरात्मजाय नमः ।
ॐ इतिहासश्रुतिस्तुत्याय नमः ।
ॐ इन्द्रभोगफलप्रदाय नमः ।
ॐ इष्टापूर्तफलप्राप्तये नमः ।
ॐ इष्टेष्टवरदायकाय नमः ।
ॐ इहामुत्रेष्टफलदाय नमः ।
ॐ इष्टदाय नमः ।
ॐ इन्द्रवन्दिताय नमः ।७०
ॐ ईडनीयाय नमः ।
ॐ ईशपुत्राय नमः ।
ॐ ईप्सितार्थप्रदायकाय नमः ।
ॐ ईतिभीतिहराय नमः ।
ॐ ईड्याय नमः ।
ॐ ईषणात्रयवर्जिताय नमः ।

ॐ उदारकीर्तये नमः ।
ॐ उद्योगिने नमः ।
ॐ उत्कृष्टोरुपराक्रमाय नमः ।
ॐ उत्कृष्टशक्तये नमः ।८०
ॐ उत्साहाय नमः ।
ॐ उदाराय नमः ।
ॐ उत्सवप्रियाय नमः ।
ॐ उज्जृम्भाय नमः ।
ॐ उद्भवाय नमः ।
ॐ उग्राय नमः ।
ॐ उदग्राय नमः ।
ॐ उग्रलोचनाय नमः ।
ॐ उन्मत्ताय नमः ।
ॐ उग्रशमनाय नमः ।९०
ॐ उद्वेगघ्नोरगेश्वराय नमः ।
ॐ उरुप्रभावाय नमः ।
ॐ उदीर्णाय नमः ।
ॐ उमापुत्राय नमः ।

ॐ उद्दारधिये नमः ।
ॐ ऊर्ध्वरेतःसुताय नमः ।
ॐ ऊर्ध्वगतिदाय नमः ।
ॐ ऊर्जपालकाय नमः ।
ॐ ऊर्जिताय नमः ।
ॐ ऊर्ध्वगाय नमः ।१००
ॐ ऊर्ध्वाय नमः ।
ॐ ऊर्ध्वलोकैकनायकाय नमः ।
ॐ ऊर्जवते नमः ।
ॐ ऊर्जितोदाराय नमः ।

ॐ ऊर्जितोर्जितशासनाय नमः ।
ॐ ऋषिदेवगणस्तुत्याय नमः ।
ॐ ऋणत्रयविमोचनाय नमः ।
ॐ ऋजुरूपाय नमः ।
ॐ ऋजुकराय नमः ।
ॐ ऋजुमार्गप्रदर्शनाय नमः ।११०
ॐ ऋतंभराय नमः ।
ॐ ऋजुप्रीताय नमः ।
ॐ ऋषभाय नमः ।
ॐ ऋद्धिदाय नमः ।

ॐ ऋताय नमः ।
ॐ लुलितोद्धारकाय नमः ।
ॐ लूतभवपाशप्रभञ्जनाय नमः ।
ॐ एणाङ्कधरसत्पुत्राय नमः ।
ॐ एकस्मै नमः ।
ॐ एनोविनाशनाय नमः ।१२०
ॐ ऐश्वर्यदाय नमः ।
ॐ ऐन्द्रभोगिने नमः ।
ॐ ऐतिह्याय नमः ।
ॐ ऐन्द्रवन्दिताय नमः ।
ॐ ओजस्विने नमः ।
ॐ ओषधिस्थानाय नमः ।
ॐ ओजोदाय नमः ।
ॐ ओदनप्रदाय नमः ।
ॐ औदार्यशीलाय नमः ।
ॐ औमेयाय नमः ।१३०
ॐ औग्राय नमः ।
ॐ औन्नत्यदायकाय नमः ।

ॐ औदार्याय नमः ।
ॐ औषधकराय नमः ।
ॐ औषधाय नमः ।
ॐ औषधाकराय नमः ।
ॐ अंशुमालिने नमः ।
ॐ अंशुमालीड्याय नमः ।
ॐ अम्बिकातनयाय नमः ।
ॐ अन्नदाय नमः ।१४०
ॐ अन्धकारिसुताय नमः ।

ॐ अन्धत्वहारिणे नमः ।
ॐ अम्बुजलोचनाय नमः ।
ॐ अस्तमायाय नमः
ॐ अमराधीशाय नमः ।
ॐ अस्पष्टाय नमः ।
ॐ अस्तोकपुण्यदाय नमः ।
ॐ अस्तामित्राय नमः ।
ॐ अस्तरूपाय नमः ।
ॐ अस्खलत्सुगतिदायकाय नमः ।
ॐ कार्तिकेयाथ नमः ।
ॐ कामरूपाय नमः ।

ॐ कुमाराय नमः ।
ॐ क्रौञ्चदारणाय नमः ।
ॐ कामदाय नमः ।
ॐ कारणाय नमः ।
ॐ काम्याय नमः ।
ॐ कमनीयाय नमः ।
ॐ कृपाकराय नमः ।
ॐ काञ्चनाभाय नमः । १६०
ॐ कान्तियुक्ताय नमः ।
ॐ कामिने नमः ।
ॐ कामप्रदाय नमः ।
ॐ कवये नमः ।
ॐ कीर्तिकृते नमः ।
ॐ कुक्कुटधराय नमः ।
ॐ कूटस्थाय नमः ।
ॐ कुवलेक्षणाय नमः ।
ॐ कुङ्कुमाङ्गाय नमः ।
ॐ क्लमहराय नमः । १७०

ॐ कुशलाय नमः ।
ॐ कुक्कुटध्वजाय नमः ।
ॐ कुशानुसंभवाय नमः ।
ॐ क्रूराय नमः ।
ॐ क्रूरघ्नाय नमः ।
ॐ कलितापहृते नमः ।
ॐ कामरूपाय नमः ।
ॐ कल्पतरवे नमः ।
ॐ कान्ताय नमः ।
ॐ कामितदायकाय नमः ।१८०
ॐ कल्याणकृते नमः ।
ॐ क्लेशनाशाय नमः ।
ॐ कृपालवे नमः ।
ॐ करुणाकराय नमः ।
ॐ कलुषघ्नाय नमः ।
ॐ क्रियाशक्तये नमः ।
ॐ कठोराय नमः ।
ॐ कवचिने नमः ।
ॐ कृतिने नमः ।
ॐ कोमलाङ्गाय नमः ।१९०

ॐ कुमाराय नमः ।
ॐ क्रौञ्चदारणाय नमः ।
ॐ कामदाय नमः ।
ॐ कारणाय नमः ।
ॐ काम्याय नमः ।
ॐ कमनीयाय नमः ।
ॐ कृपाकराय नमः ।
ॐ काञ्चनाभाय नमः । १६०
ॐ कान्तियुक्ताय नमः ।
ॐ कामिने नमः ।
ॐ कामप्रदाय नमः ।
ॐ कवये नमः ।
ॐ कीर्तिकृते नमः ।
ॐ कुक्कुटधराय नमः ।
ॐ कूटस्थाय नमः ।
ॐ कुवलेक्षणाय नमः ।
ॐ कुङ्कुमाङ्गाय नमः ।
ॐ क्लमहराय नमः । १७०

ॐ कुशलाय नमः ।
ॐ कुक्कुटध्वजाय नमः ।
ॐ कुशानुसंभवाय नमः ।
ॐ क्रूराय नमः ।
ॐ क्रूरघ्नाय नमः ।
ॐ कलितापहृते नमः ।
ॐ कामरूपाय नमः ।
ॐ कल्पतरवे नमः ।
ॐ कान्ताय नमः ।
ॐ कामितदायकाय नमः । १८०

ॐ कल्याणकृते नमः ।
ॐ क्लेशनाशाय नमः ।
ॐ कृपालवे नमः ।
ॐ करुणाकराय नमः ।
ॐ कलुषघ्नाय नमः ।
ॐ क्रियाशक्तये नमः ।
ॐ कठोराय नमः ।
ॐ कवचिने नमः ।
ॐ कृतिने नमः ।
ॐ कोमलाङ्गाय नमः ।१९०

ॐ कुशप्रीताय नमः ।
ॐ कुत्सितघ्नाय नमः ।
ॐ कलाधराय नमः ।
ॐ ख्याताय नमः ।
ॐ खेटधराय नमः ।
ॐ खड्गिने नमः ।
ॐ खट्वाङ्गिने नमः ।
ॐ खलनिग्रहाय नमः ।
ॐ ख्यातिप्रदाय नमः ।

ॐ खेचरेशाय नमः ।२००
ॐ ख्यातेहाय नमः ।
ॐ खेचरस्तुताय नमः ।
ॐ खरतापहराय नमः ।
ॐ खस्थाय नमः ।
ॐ खेचराय नमः ।
ॐ खेचराश्रयाय नमः ।
ॐ खण्डेन्दुमौलितनयाय नमः ।
ॐ खेलाय नमः ।

ॐ खेचरपालकाय नमः ।
ॐ खस्थलाय नमः । २१०
ॐ खण्डितार्काय नमः ।
ॐ खेचरीजनपूजिताय नमः ।
ॐ गाङ्गेयाय नमः ।
ॐ गिरिजापुत्राय नमः ।
ॐ गणनाथानुजाय नमः ।
ॐ गुहाय नमः ।
ॐ गोप्त्रे नमः ।
ॐ गीर्वाणसंसेव्याय नमः ।

ॐ गुणातीताय नमः ।
ॐ गुहाश्रयाय नमः ।२२०
ॐ गतिप्रदाय नमः ।
ॐ गुणनिधये नमः ।
ॐ गम्भीराय नमः ।
ॐ गिरिजात्मजाय नमः ।
ॐ गूढरूपाय नमः ।
ॐ गदहराय नमः ।
ॐ गुणाधीशाय नमः ।
ॐ गुणाग्रण्ये नमः ।

ॐ गोधराय नमः ।
ॐ गहनाय नमः ।२३०
ॐ गुप्ताय नमः ।
ॐ गर्वघ्नाय नमः ।
ॐ गुणवर्धनाय नमः ।
ॐ गुह्याय नमः ।
ॐ गुणज्ञाय नमः ।
ॐ गीतिज्ञाय नमः ।
ॐ गतातङ्काय नमः ।
ॐ गुणाश्रयाय नमः ।
ॐ गद्यपद्यप्रियाय नमः ।
ॐ गुण्याय नमः ।२४०
ॐ गोस्तुताय नमः ।
ॐ गगनेचराय नमः ।
ॐ गणनीयचरित्राय नमः ।
ॐ गतक्लेशाय नमः ।
ॐ गुणार्णवाय नमः ।
ॐ घूर्णिताक्षाय नमः ।

ॐ घृणानिधये नमः ।
ॐ घनगम्भीरघोषणाय नमः ।
ॐ घण्टानादप्रियाय नमः ।
ॐ घोषाय नमः । २५०
ॐ घोराघौघविनाशनाय नमः ।
ॐ घनानन्दाय नमः ।
ॐ घर्महन्त्रे नमः ।
ॐ घृणावते नमः ।
ॐ घृष्टिपातकाय नमः ।
ॐ घृणिने नमः ।

ॐ घृणाकराय नमः ।
ॐ घोराय नमः ।
ॐ घोरदैत्यप्रहारकाय नमः ।
ॐ घटितैश्वर्यसंदोहाय नमः ।
ॐ घनार्थाय नमः ।
ॐ घनसंक्रमाय नमः ।
ॐ चित्रकृते नमः ।
ॐ चित्रवर्णाय नमः ।
ॐ चञ्चलाय नमः ।
ॐ चपलद्युतये नमः ।

ॐ चिन्मयाय नमः ।
ॐ चित्स्वरूपाय नमः ।
ॐ चिरानन्दाय नमः ।
ॐ चिरन्तनाय नमः । २७०
ॐ चित्रकेलये नमः ।
ॐ चित्रतराय नमः ।
ॐ चिन्तनीयाय नमः ।
ॐ चमत्कृतये नमः ।
ॐ चोरघ्नाय नमः ।
ॐ चतुराय नमः ।
ॐ चारवे नमः ।
ॐ चामीकरविभूषणाय नमः ।
ॐ चन्द्रार्ककोटिसदृशाय नमः ।
ॐ चन्द्रमौलितनूभवाय नमः । २८०
ॐ छादिताङ्गाय नमः ।
ॐ छद्महन्त्रे नमः ।
ॐ छेदिताखिलपातकाय नमः ।
ॐ छेदीकृततमःक्लेशाय नमः ।

ॐ छत्रीकृतमहायशसे नमः ।
ॐ छादिताशेषसंतापाय नमः ।
ॐ छरितामृतसागराय नमः ।
ॐ छन्नत्रैगुण्यरूपाय नमः ।
ॐ छातेहाय नमः ।
ॐ छिन्नसंशयाय नमः । २९०
ॐ छन्दोमयाय नमः ।
ॐ छन्दगामिने नमः ।
ॐ छिन्नपापाय नमः ।
ॐ छविच्छदाय नमः ।

ॐ जगद्धिताय नमः ।
ॐ जगत्पूज्याय नमः ।
ॐ जगज्ज्येष्ठाय नमः ।
ॐ जगन्मयाय नमः ।
ॐ जनकाय नमः ।
ॐ जाह्नवीसूनवे नमः । ३००
ॐ जितामित्राय नमः ।
ॐ जगद्गुरवे नमः ।
ॐ जयिने नमः ।
ॐ जितेन्द्रियाय नमः ।

ॐ जैत्राय नमः ।
ॐ जरामरणवर्जिताय नमः ।
ॐ ज्योतिर्मयाय नमः ।
ॐ जगन्नाथाय नमः ।
ॐ जगज्जीवाय नमः ।
ॐ जनाश्रयाय नमः ।३१०
ॐ जगत्सेव्याय नमः ।
ॐ जगत्कर्त्रे नमः ।
ॐ जगत्साक्षिणे नमः ।
ॐ जगत्प्रियाय नमः ।
ॐ जम्भारिवन्द्याय नमः ।
ॐ जयदाय नमः ।
ॐ जगज्जनमनोहराय नमः ।
ॐ जगदानन्दजनकाय नमः ।
ॐ जनजाड्यापहारकाय नमः ।
ॐ जपाकुसुमसंकाशाय नमः ।
ॐ जनलोचनशोभनाय नमः ।
ॐ जनेश्वराय नमः ।

ॐ जितक्रोधाय नमः ।

ॐ जनजन्मनिबर्हणाय नमः ।

ॐ जयदाय नमः ।

ॐ जन्तुतापघ्नाय नमः ।

ॐ जितदैत्यमहाव्रजाय नमः ।

ॐ जितमायाय नमः ।

ॐ जितक्रोधाय नमः ।

ॐ जितसंगाय नमः ।

ॐ जनप्रियाय नमः ।

ॐ झंझानिलमहावेगाय नमः ।

ॐ झरिताशेषपातकाय नमः ।

ॐ झर्झरीकृतदैत्यौघाय नमः ।

ॐ झल्लरीवाद्यसंप्रियाय नमः ।

ॐ ज्ञानमूर्तये नमः ।

ॐ ज्ञानगम्याय नमः ।

ॐ ज्ञानिने नमः ।

ॐ ज्ञानमहानिधये नमः ।

ॐ टंकारनृत्तविभवाय नमः ।३४०

ॐ टंकवज्रध्वजाङ्किताय नमः ।

ॐ टंकितनिखिललोकाय नमः ।

ॐ टंकितैनस्तमोरवये नमः ।
ॐ डंबरप्रभवाय नमः ।
ॐ डंभाय नमः ।
ॐ डंबाय नमः ।
ॐ डमरुकप्रियाय नमः ।
ॐ डमरोत्कटसन्नादाय नमः ।
ॐ डिंभरूपस्वरूपकाय नमः ।
ॐ ढक्कानादप्रीति-
कराय नमः ।३५०

ॐ ढालितासुरसंदोहाय नमः ।
ॐ ढौकितामरसंदोहाय नमः ।
ॐ ढुंढिविघ्नेश्वरानुजाय नमः ।
ॐ तत्त्वज्ञाय नमः ।
ॐ तत्वगाय नमः ।
ॐ तीव्राय नमः ।
ॐ तपोरूपाय नमः ।
ॐ तपोमयाय नमः ।
ॐ त्रयीमयाय नमः ।

ॐ त्रिकालज्ञाय नमः । ३६०
ॐ त्रिमूर्तये नमः ।
ॐ त्रिगुणात्मकाय नमः ।
ॐ त्रिदशेशाय नमः ।
ॐ तारकारये नमः ।
ॐ तापघ्नाय नमः ।
ॐ तापसप्रियाय नमः ।
ॐ तुष्टिदाय नमः ।
ॐ तुष्टिकृते नमः ।
ॐ तीक्ष्णाय नमः ।

ॐ तपोरूपाय नमः । ३७०
ॐ त्रिकालविदे नमः ।
ॐ स्तोत्रे नमः ।
ॐ स्तव्याय नमः ।
ॐ स्तवप्रीताय नमः ।
ॐ स्तुतये नमः ।
ॐ स्तोत्राय नमः ।
ॐ स्तुतिप्रियाय नमः ।
ॐ स्थिताय नमः ।
ॐ स्थायिने नमः ।

ॐ स्थापकाय नमः । ३८०
ॐ स्थूलसूक्ष्मप्रदर्शकाय नमः ।
ॐ स्थविष्ठाय नमः ।
ॐ स्थविराय नमः ।
ॐ स्थूलाय नमः ।
ॐ स्थानदाय नमः ।
ॐ स्थैर्यदाय नमः ।
ॐ स्थिराय नमः ।
ॐ दान्ताय नमः ।
ॐ दयापराय नमः ।
ॐ दात्रे नमः ।
ॐ दुरितघ्नाय नमः ।
ॐ दुरासदाय नमः ।
ॐ दर्शनीयाय नमः ।
ॐ दयासाराय नमः ।
ॐ देवदेवाय नमः ।
ॐ दयानिधये नमः ।
ॐ दुराधर्षाय नमः ।

ॐ दुर्विगाह्याय नमः ।
ॐ दक्षाय नमः ।
ॐ दर्पणशोभिताय नमः । ४००
ॐ दुर्धराय नमः ।
ॐ दानशीलाय नमः ।
ॐ द्वादशाक्षाय नमः ।
ॐ द्विषड्भुजाय नमः ।
ॐ द्विषट्कर्णाय नमः ।
ॐ द्विषड्बाहवे नमः ।
ॐ दीनसंतापनाशनाय नमः ।

ॐ दन्दशूकेश्वराय नमः ।
ॐ देवाय नमः ।
ॐ दिव्याय नमः । ४०१
ॐ दिव्याकृतये नमः ।
ॐ दमाय नमः ।
ॐ दीर्घवृत्ताय नमः ।
ॐ दीर्घबाहवे नमः ।
ॐ दीर्घदृष्टये नमः ।
ॐ दिवस्पतये नमः ।
ॐ दण्डाय नमः ।

ॐ दमयित्रे नमः ।
ॐ दर्पाय नमः ।
ॐ देवसिंहाय नमः । ४२०
ॐ दृढव्रताय नमः ।
ॐ दुर्लभाय नमः ।
ॐ दुर्गमाय नमः ।
ॐ दीप्ताय नमः ।
ॐ दुष्प्रेक्ष्याय नमः ।
ॐ दिव्यमण्डनाय नमः ।
ॐ दुरोदरघ्नाय नमः ।
ॐ दुःखघ्नाय नमः ।
ॐ दुरारिघ्नाय नमः ।
ॐ दिशांपतये नमः । ४३०
ॐ दुर्जयाय नमः ।
ॐ देवसेनेशाय नमः ।
ॐ दुर्ज्ञेयाय नमः ।
ॐ दुरतिक्रमाय नमः ।
ॐ दम्भाय नमः ।

ॐ द्दप्ताय नमः ।
ॐ देवर्षये नमः ।
ॐ दैवज्ञाय नमः ।
ॐ दैवचिन्तकाय नमः ।
ॐ धुरंधराय नमः । ४४०
ॐ धर्मपराय नमः ।
ॐ धनदाय नमः ।
ॐ धृतिवर्धनाय नमः ।
ॐ धर्मेशाय नमः ।
ॐ धर्मशास्त्रज्ञाय नमः ।

ॐ धन्विने नमः ।
ॐ धर्मपरायणाय नमः ।
ॐ धनाध्यक्षाय नमः ।
ॐ धनपतये नमः ।
ॐ धृतिमते नमः । ४५०
ॐ धूतकिल्बिषाय नमः ।
ॐ धर्महेतवे नमः ।
ॐ धर्मशूराय नमः ।
ॐ धर्मकृते नमः ।
ॐ धर्मविदे नमः ।

ॐ ध्रुवाय नमः ।
ॐ धात्रे नमः ।
ॐ धीमते नमः ।
ॐ धर्मचारिणे नमः ।
ॐ धन्याय नमः ।४६०
ॐ धुर्याय नमः ।
ॐ धृतव्रताय नमः ।
ॐ नित्योत्सवाय नमः ।
ॐ नित्यतृप्ताय नमः ।

ॐ निर्लेपाय नमः ।
ॐ निश्चलात्मकाय नमः ।
ॐ निरवद्याय नमः ।
ॐ निराधाराय नमः ।
ॐ निष्कलङ्काय नमः ।
ॐ निरञ्जनाय नमः ।४७०
ॐ निर्ममाय नमः ।
ॐ निरहंकाराय नमः ।
ॐ निर्मोहाय नमः ।

ॐ निरुपद्रवाय नमः ।
ॐ नित्यानन्दाय नमः ।
ॐ निरातङ्काय नमः ।
ॐ निष्प्रपञ्चाय नमः ।
ॐ निरामयाय नमः ।
ॐ निरवद्याय नमः ।
ॐ निरीहाय नमः ।४८०
ॐ निर्दर्शाय नमः ।
ॐ निर्मलात्मकाय नमः ।
ॐ नित्यानन्दाय नमः ।

ॐ निर्जरेशाय नमः ।
ॐ निःसंगाय नमः ।
ॐ निगमस्तुताय नमः ।
ॐ निष्कण्टकाय नमः ।
ॐ निरालम्बाय नमः ।
ॐ निष्प्रत्यूहाय नमः ।
ॐ निरुद्भवाय नमः ।४९०
ॐ नित्याय नमः ।
ॐ नियतकल्याणाय नमः ।
ॐ निर्विकल्पाय नमः ।

ॐ निराश्रयाय नमः ।
ॐ नेत्रे नमः ।
ॐ निधये नमः ।
ॐ नैकरूपाय नमः ।
ॐ निराकाराय नमः ।
ॐ नदीसुताय नमः ।
ॐ पुलिन्दकन्या-
रमणाय नमः । ५००
ॐ पुरुजिते नमः ।

ॐ परमप्रियाय नमः ।
ॐ प्रत्यक्षमूर्तये नमः ।
ॐ प्रत्यक्षाय नमः ।
ॐ परेशाय नमः ।
ॐ पूर्णपुण्यदाय नमः ।
ॐ पुण्याकराय नमः ।
ॐ पुण्यरूपाय नमः ।
ॐ पुण्याय नमः ।
ॐ पुण्यपरायणाय नमः । ५१०

ॐ पुण्योदयाय नमः ।
ॐ परस्मै ज्योतिषे नमः ।
ॐ पुण्यकृते नमः ।
ॐ पुण्यवर्धनाय नमः ।
ॐ परानन्दाय नमः ।
ॐ परतराय नमः ।
ॐ पुण्यकीर्तये नमः ।
ॐ पुरातनाय नमः ।
ॐ प्रसन्नरूपाय नमः ।
ॐ प्राणेशाय नमः ।५२०

ॐ पन्नगाय नमः ।
ॐ पापनाशनाय नमः ।
ॐ प्रणतार्तिहराय नमः ।
ॐ पूर्णाय नमः ।
ॐ पार्वतीनन्दनाय नमः ।
ॐ प्रभवे नमः ।
ॐ पूतात्मने नमः ।
ॐ पुरुषाय नमः ।
ॐ प्राणाय नमः ।
ॐ प्रभवाय नमः । ५३०

ॐ पुरुषोत्तमाय नमः ।
ॐ प्रसन्नाय नमः ।
ॐ परमस्पष्टाय नमः ।
ॐ पराय नमः ।
ॐ परिवृढाय नमः ।
ॐ परस्मै नमः ।
ॐ परमात्मने नमः ।
ॐ परब्रह्मणे नमः ।
ॐ परार्थाय नमः ।
ॐ प्रियदर्शनाय नमः ।५४०
ॐ पवित्राय नमः ।
ॐ पुष्टिदाय नमः ।
ॐ पूर्तये नमः ।
ॐ पिङ्गलाय नमः ।
ॐ पुष्टिवर्धनाय नमः ।
ॐ पापहारिणे नमः ।
ॐ पाशधराय नमः ।
ॐ प्रमत्तासुरशिक्षकाय नमः ।

ॐ पावनाय नमः ।
ॐ पावकाय नमः ।५५०
ॐ पूज्याय नमः ।
ॐ पूर्णानन्दाय नमः ।
ॐ परात्पराय नमः ।
ॐ पुष्कलाय नमः ।
ॐ प्रवराय नमः ।
ॐ पूर्वस्मै नमः ।
ॐ पितृभक्ताय नमः ।
ॐ पुरोगमाय नमः ।
ॐ प्राणदाय नमः ।
ॐ प्राणिजनकाय नमः ।५६०
ॐ प्रदिष्टाय नमः ।
ॐ पावकोद्भवाय नमः ।
ॐ परब्रह्मस्वरूपाय नमः ।
ॐ परमैश्वर्यकारणाय नमः ।
ॐ परर्द्धिदाय नमः ।
ॐ पुष्टिकराय नमः ।
ॐ प्रकाशात्मने नमः ।
ॐ प्रतापवते नमः ।

ॐ प्रज्ञापराय नमः ।
ॐ प्रकृष्टार्थाय नमः । ५७०
ॐ पृथवे नमः ।
ॐ पृथुपराक्रमाय नमः ।
ॐ फणीश्वराय नमः ।
ॐ फणिवराय नमः ।
ॐ फणामणिविभूषणाय नमः ।
ॐ फलदाय नमः ।
ॐ फलहस्ताय नमः ।
ॐ फुल्लाम्बुजविलोचनाय नमः ।
ॐ फडुच्चाटितपापौघाय नमः ।
ॐ फणिलोकविभूषणाय नमः ।
ॐ बाहुलेयाय नमः ।
ॐ बृहद्रूपाय नमः ।
ॐ बलिष्ठाय नमः ।
ॐ बलवते नमः ।
ॐ बलिने नमः ।
ॐ ब्रह्मेशविष्णुरूपाय नमः ।

ॐ बुद्धाय नमः ।
ॐ बुद्धिमतां वराय नमः ।
ॐ बालरूपाय नमः ।
ॐ ब्रह्मगर्भाय नमः । ५९०
ॐ ब्रह्मचारिणे नमः ।
ॐ बुधप्रियाय नमः ।
ॐ बहुश्रुताय नमः ।
ॐ बहुमताय नमः ।
ॐ ब्रह्मण्याय नमः ।
ॐ ब्राह्मणप्रियाय नमः ।

ॐ बलप्रमथनाय नमः ।
ॐ ब्रह्मणे नमः ।
ॐ बहुरूपाय नमः ।
ॐ बहुप्रदाय नमः । ६००
ॐ बृहद्भानुतनूद्भूताय नमः ।
ॐ बृहत्सेनाय नमः ।
ॐ बिलेशयाय नमः ।
ॐ बहुबाहवे नमः ।
ॐ बलश्रीमते नमः ।
ॐ बहुदैत्यविनाशकाय नमः ।

ॐ बिलद्वारान्तरालस्थाय नमः ।
ॐ बृहच्छक्तिधनुर्धराय नमः ।
ॐ बालार्कद्युतिमते नमः ।
ॐ बालाय नमः । ६१०
ॐ बृहद्वक्षसे नमः ।
ॐ बृहद्धनुषे नमः ।
ॐ भव्याय नमः ।
ॐ भोगीश्वराय नमः ।
ॐ भाव्याय नमः ।
ॐ भवनाशाय नमः ।
ॐ भवप्रियाय नमः ।
ॐ भक्तिगम्याय नमः ।
ॐ भयहराय नमः ।
ॐ भावज्ञाय नमः । ६२०
ॐ भक्तसुप्रियाय नमः ।
ॐ भुक्तिमुक्तिप्रदाय नमः ।
ॐ भोगिने नमः ।
ॐ भगवते नमः ।

ॐ भाग्यवर्धनाय नमः ।
ॐ भ्राजिष्णवे नमः ।
ॐ भावनाय नमः ।
ॐ भर्त्रे नमः ।
ॐ भीमाय नमः ।
ॐ भीमपराक्रमाय नमः । ६३०
ॐ भूतिदाय नमः ।
ॐ भूतिकृते नमः ।
ॐ भोक्त्रे नमः ।
ॐ भूतात्मने नमः ।
ॐ भुवनेश्वराय नमः ।
ॐ भावकाय नमः ।
ॐ भीकराय नमः ।
ॐ भीष्माय नमः ।
ॐ भावकेष्टाय नमः ।
ॐ भवोद्भवाय नमः । ६४०
ॐ भवतापप्रशमनाय नमः ।
ॐ भोगवते नमः ।
ॐ भूतभावनाय नमः ।
ॐ भोज्यप्रदाय नमः ।

ॐ भ्रान्तिनाशनाय नमः ।
ॐ भानुमते नमः ।
ॐ भुवनाश्रयाय नमः ।
ॐ भूरिभोगप्रदाय नमः ।
ॐ भद्राय नमः ।
ॐ भजनीयाय नमः । ६५०
ॐ भिषग्वराय नमः ।
ॐ महासेनाय नमः ।
ॐ महोदाराय नमः ।
ॐ महाशक्तये नमः ।
ॐ महाद्युतये नमः ।
ॐ महाबुद्धये नमः ।
ॐ महावीर्याय नमः ।
ॐ महोत्साहाय नमः ।
ॐ महाबलाय नमः ।
ॐ महाभोगिने नमः । ६६०
ॐ महामायिने नमः ।
ॐ मेधाविने नमः ।

ॐ मेखलिने नमः ।
ॐ महते नमः ।
ॐ मुनिस्तुताय नमः ।
ॐ महामान्याय नमः ।
ॐ महानन्दाय नमः ।
ॐ महायशसे नमः ।
ॐ महोर्जिताय नमः ।
ॐ माननिधये नमः । ६७०
ॐ मनोरथफलप्रदाय नमः ।
ॐ महोदयाय नमः ।

ॐ महापुण्याय नमः ।
ॐ महाबलपराक्रमाय नमः ।
ॐ मानदाय नमः ।
ॐ मतिदाय नमः ।
ॐ मालिने नमः ।
ॐ मुक्तामालाविभूषणाय नमः ।
ॐ मनोहराय नमः ।
ॐ महामुख्याय नमः । ६८०
ॐ महर्द्धये नमः ।
ॐ मूर्तिमते नमः ।

ॐ मुनये नमः ।
ॐ महोत्तमाय नमः ।
ॐ महोपायाय नमः ।
ॐ मोक्षदाय नमः ।
ॐ मङ्गलप्रदाय नमः ।
ॐ मुदाकराय नमः ।
ॐ मुक्तिदात्रे नमः ।
ॐ महाभोगाय नमः । ६९०
ॐ महोरगाय नमः ।

ॐ यशस्कराय नमः ।
ॐ योगयोनये नमः ।
ॐ योगिष्ठाय नमः ।
ॐ यमिनां वराय नमः ।
ॐ यशस्विने नमः ।
ॐ योगपुरुषाय नमः ।
ॐ योग्याय नमः ।
ॐ योगनिधये नमः ।
ॐ यमिने नमः ।

ॐ यतिसेव्याय नमः ।
ॐ योगयुक्ताय नमः ।
ॐ योगविदे नमः ।
ॐ योगसिद्धिदाय नमः ।
ॐ यन्त्राय नमः ।
ॐ यन्त्रिणे नमः ।
ॐ यन्त्रज्ञाय नमः ।
ॐ यन्त्रवते नमः ।
ॐ यन्त्रवाहकाय नमः ।
ॐ यातनारहिताय नमः । ७१०

ॐ योगिने नमः ।
ॐ योगीशाय नमः ।
ॐ योगिनां वराय नमः ।
ॐ रमणीयाय नमः ।
ॐ रम्यरूपाय नमः ।
ॐ रसज्ञाय नमः ।
ॐ रसभावनाय नमः ।
ॐ रञ्जनाय नमः ।
ॐ रञ्जिताय नमः ।
ॐ रागिणे नमः । ७२०

ॐ रुचिराय नमः ।
ॐ रुद्रसंभवाय नमः ।
ॐ रणप्रियाय नमः ।
ॐ रणोदाराय नमः ।
ॐ रागद्वेषविनाशनाय नमः ।
ॐ रत्नार्चिषे नमः ।
ॐ रुचिराय नमः ।
ॐ रम्याय नमः ।
ॐ रूपलावण्यविग्रहाय नमः ।

ॐ रत्नाङ्गदधराय नमः ।७३०
ॐ रत्नभूषणाय नमः ।
ॐ रमणीयकाय नमः ।
ॐ रुचिकृते नमः ।
ॐ रोचमानाय नमः ।
ॐ रञ्जिताय नमः ।
ॐ रोगनाशनाय नमः ।
ॐ राजीवाक्षाय नमः ।
ॐ राजराजाय नमः ।

ॐ रक्तमाल्यानुलेपनाय नमः ।
ॐ राजद्वेदागमस्तुत्याय नमः । ७४०
ॐ रजःसत्त्वगुणान्विताय नमः ।
ॐ रजनीशकलारम्याय नमः ।
ॐ रत्नकुण्डलमण्डिताय नमः ।
ॐ रत्नसन्मौलिशोभाढ्याय नमः ।
ॐ रणन्मञ्जीरभूषणाय नमः ।
ॐ लोकैकनाथाय नमः ।
ॐ लोकेशाय नमः ।
ॐ ललिताय नमः
ॐ लोकनायकाय नमः ।
ॐ लोकरक्षाय नमः । ७५०
ॐ लोकशिक्षाय नमः ।
ॐ लोकलोचनरञ्जिताय नमः ।
ॐ लोकबन्धवे नमः ।
ॐ लोकधात्रे नमः ।
ॐ लोकत्रयमहाहिताय नमः ।
ॐ लोकचूडामणये नमः ।
ॐ लोकवन्द्याय नमः ।
ॐ लावण्यविग्रहाय नमः ।

ॐ लोकाध्यक्षाय नमः ।
ॐ लीलावते नमः । ७६०
ॐ लोकोत्तरगुणान्विताय नमः ।
ॐ वरिष्ठाय नमः ।
ॐ वरदाय नमः ।
ॐ वैद्याय नमः ।
ॐ विशिष्टाय नमः ।
ॐ विक्रमाय नमः ।
ॐ विभवे नमः ।
ॐ विबुधाग्रचराय नमः ।
ॐ वश्याय नमः ।
ॐ विकल्पपरिवर्जिताय नमः । ७७०
ॐ विपाशाय नमः ।
ॐ विगतातङ्काय नमः ।
ॐ विचित्राङ्गाय नमः ।
ॐ विरोचनाय नमः ।
ॐ विद्याधराय नमः ।
ॐ विशुद्धात्मने नमः ।

ॐ वेदाङ्गाय नमः ।
ॐ विबुधप्रियाय नमः ।
ॐ वचस्कराय नमः ।
ॐ व्यापकाय नमः ।७८०
ॐ विज्ञानिने नमः ।
ॐ विनयान्विताय नमः ।
ॐ विद्वत्तमाय नमः ।
ॐ विरोधिघ्नाय नमः ।
ॐ वीराय नमः ।
ॐ विगतरागवते नमः ।

ॐ वीतभावाय नमः ।
ॐ विनीतात्मने नमः ।
ॐ वेदगर्भाय नमः ।
ॐ वसुप्रदाय नमः ।७९०
ॐ विश्वदीप्तये नमः ।
ॐ विशालाक्षाय नमः ।
ॐ विजितात्मने नमः ।
ॐ विभावनाय नमः ।
ॐ वेदवेद्याय नमः ।
ॐ विधेयात्मने नमः ।

ॐ वीतदोषाय नमः ।
ॐ वेदविदे नमः ।
ॐ विश्वकर्मणे नमः ।
ॐ वीतभयाय नमः । ८००
ॐ वागीशाय नमः ।
ॐ वासवार्चिताय नमः ।
ॐ वीरध्वंसाय नमः ।
ॐ विश्वमूर्तये नमः ।
ॐ विश्वरूपाय नमः ।
ॐ वरासनाय नमः ।
ॐ विशाखाय नमः ।
ॐ विमलाय नमः ।
ॐ वाग्मिने नमः ।
ॐ विदुषे नमः । ८१०
ॐ वेदधराय नमः ।
ॐ वटवे नमः ।
ॐ वीरचूडामणये नमः ।
ॐ वीराय नमः ।

ॐ विद्येशाय नमः ।
ॐ बिकुधाश्रयाय नमः ।
ॐ विजयिने नमः ।
ॐ विनयिने नमः ।
ॐ वेत्रे नमः ।
ॐ वरीयसे नमः ।८२०
ॐ विरजसे नमः ।
ॐ वमवे नमः ।
ॐ वाग्मिनाय नमः ।
ॐ विज्वरगय नम· ।
ॐ वेद्याय नमः ।
ॐ वेगवते नमः ।
ॐ वीर्यवते नमः ।
ॐ वशिने नमः ।
ॐ वरशीलाय नमः ।
ॐ वरगुणाय नमः ।८३०
ॐ विशोकाय नमः ।
ॐ वज्रधारकाय नमः ।
ॐ शरजन्मने नमः ।
ॐ शक्तिधराय नमः ।

ॐ शत्रुघ्नाय नमः ।

ॐ शिखिवाहनाय नमः ।

ॐ श्रीमते नमः ।

ॐ शिष्टाय नमः ।

ॐ शुचये नमः ।

ॐ शुद्धाय नमः । ८४०

ॐ शाश्वताय नमः ।

ॐ श्रुतिसागराय नमः ।

ॐ शरण्याय नमः ।

ॐ शुभदाय नमः ।

ॐ शर्मणे नमः ।

ॐ शिष्टेष्टाय नमः ।

ॐ शुभलक्षणाय नमः ।

ॐ शान्ताय नमः ।

ॐ शूलधराय नमः ।

ॐ श्रेष्ठाय नमः । ८५०

ॐ शुद्धात्मने नमः ।

ॐ शंकराय नमः ।

ॐ शिवाय नमः ।
ॐ शितिकण्ठात्मजाय नमः ।
ॐ शूराय नमः ।
ॐ शान्तिदाय नमः ।
ॐ शोकनाशनाय नमः ।
ॐ षाण्मातुराय नमः ।
ॐ षण्मुखाय नमः ।
ॐ षड्गुणैश्वर्यसंयुताय नमः । ८६०
ॐ षट्चक्रस्थाय नमः ।
ॐ षडूर्मिघ्नाय नमः ।
ॐ षडङ्गश्रुतिपारगाय नमः ।
ॐ षड्भावरहिताय नमः ।
ॐ षट्काय नमः ।
ॐ षट्शास्त्रस्मृतिपारगाय नमः ।
ॐ षड्वर्गदात्रे नमः ।
ॐ षड्ग्रीवाय नमः ।
ॐ षडरिघ्नाय नमः ।
ॐ षडाश्रयाय नमः । ८७०
ॐ षट्किरीटधराय नमः ।
ॐ षडाधाराय नमः ।

ॐ षट्क्रमाय नमः ।
ॐ षट्कोणमध्यनिलयाय नमः ।
ॐ षण्डत्वपरिहारकाय नमः ।
ॐ सेनान्ये नमः ।
ॐ सुभगाय नमः ।
ॐ स्कन्दाय नमः ।
ॐ सुरानन्दाय नमः ।
ॐ सतां गतये नमः ।८८०
ॐ सुब्रह्मण्याय नमः ।
ॐ सुराध्यक्षाय नमः ।
ॐ सर्वज्ञाय नमः ।
ॐ सर्वदाय नमः ।
ॐ सुखिने नमः ।
ॐ सुलभाय नमः ।
ॐ सिद्धिदाय नमः ।
ॐ सौम्याय नमः ।
ॐ सिद्धेशाय नमः ।
ॐ सिद्धिसाधनाय नमः ।८९०

ॐ सिद्धार्थाय नमः ।
ॐ सिद्धसंकल्पाय नमः ।
ॐ सिद्धसाधवे नमः ।
ॐ सुरेश्वराय नमः ।
ॐ सुभुजाय नमः ।
ॐ सर्वदृशे नमः ।
ॐ साक्षिणे नमः ।
ॐ सुप्रसादाय नमः ।
ॐ सनातनाय नमः ।
ॐ सुधापतये नमः ।९००

ॐ स्वयंज्योतिषे नमः ।
ॐ स्वयंभुवे नमः ।
ॐ सर्वतोमुखाय नमः ।
ॐ समर्थाय नमः ।
ॐ सत्कृतये नमः ।
ॐ सूक्ष्माय नमः ।
ॐ सुघोषाय नमः ।
ॐ सुखदाय नमः ।
ॐ सुहृदे नमः ।
ॐ सुप्रसन्नाय नमः ।९१०

ॐ सुरश्रेष्ठाय नमः ।
ॐ सुशीलाय नमः ।
ॐ सत्यसाधकाय नमः ।
ॐ संभाव्याय नमः ।
ॐ सुमनसे नमः ।
ॐ सेव्याय नमः ।
ॐ सकलागमपारगाय नमः ।
ॐ सुव्यक्ताय नमः ।
ॐ सच्चिदानन्दाय नमः ।

ॐ सुवीराय नमः ।९२०
ॐ सुजनाश्रयाय नमः ।
ॐ सर्वलक्षणसंपन्नाय नमः ।
ॐ सत्यधर्मपरायणाय नमः ।
ॐ सर्वदेवमयाय नमः ।
ॐ सत्याय नमः ।
ॐ सदामृष्टान्नदायकाय नमः ।
ॐ सुधापिने नमः ।
ॐ सुमतये नमः ।

ॐ सत्याय नमः ।
ॐ सर्वविघ्नविनाशनाय नमः ।१३०
ॐ सर्वःदुखप्रशमनाय नमः ।
ॐ सुकुमाराय नमः ।
ॐ सुलोचनाय नमः ।
ॐ सुग्रीवाय नमः ।
ॐ सुधृतये नमः ।
ॐ साराय नमः ।
ॐ सुराराध्याय नमः ।
ॐ सुविक्रमाय नमः ।
ॐ सुरारिघ्नाय नमः ।
ॐ स्वर्णवर्णाय नमः । १४०
ॐ सर्पराजाय नमः ।
ॐ सदाशुचये नमः ।
ॐ सप्ताचिर्भुवे नमः ।
ॐ सुरवराय नमः ।
ॐ सर्वायुधविशारदाय नमः ।
ॐ हस्तिचर्माम्बरसुताय नमः ।
ॐ हस्तिवाहनसेविताय नमः ।
ॐ हस्तचित्रायुधधराय नमः ।

ॐ हताघाय नमः ।
ॐ हसिताननाय नमः । १५०
ॐ हेमभूषाय नमः ।
ॐ हरिद्वर्णाय नमः ।
ॐ हृष्टिदाय नमः ।
ॐ हृष्टिवर्धनाय नमः ।
ॐ हेमाद्रिभिदे नमः ।
ॐ हंसरूपाय नमः ।
ॐ हुंकारहतकिल्बिषाय नमः ।

ॐ हिमाद्रिजातातनुजाय नमः ।
ॐ हरिकेशाय नमः ।
ॐ हिरण्मयाय नमः । १६०
ॐ हृद्याय नमः ।
ॐ हृष्टाय नमः ।
ॐ हरिसखाय नमः ।
ॐ हंसाय नमः ।
ॐ हंसगतये नमः ।
ॐ हविषे नमः ।

ॐ हिरण्यवर्णाय नमः ।
ॐ हितकृते नमः ।
ॐ हर्षदाय नमः ।
ॐ हेमभूषणाय नमः । १७०
ॐ हरप्रियाय नमः ।
ॐ हितकराय नमः ।
ॐ हतपापाय नमः ।
ॐ हरोद्भवाय नमः ।
ॐ क्षेमदाय नमः ।
ॐ क्षेमकृते नमः ।

ॐ क्षेम्याय नमः ।
ॐ क्षेत्रज्ञाय नमः ।
ॐ क्षामवर्जिताय नमः ।
ॐ क्षेत्रपालाय नमः । १८०
ॐ क्षमाधाराय नमः ।
ॐ क्षेमक्षेत्राय नमः ।
ॐ क्षमाकराय नमः ।
ॐ क्षुद्रघ्नाय नमः ।
ॐ क्षान्तिदाय नमः ।
ॐ क्षेमाय नमः ।

ॐ क्षितिभूषाय नमः ।
ॐ क्षमाश्रयाय नमः ।
ॐ क्षालिताघाय नमः ।
ॐ क्षितिधराय नमः ।९९०
ॐ क्षीणसंरक्षणक्षमाय नमः ।
ॐ क्षणभङ्गुरसंनद्धघन-
शोभिकपर्दकाय नमः ।
ॐ क्षितिभृन्नाथतनया-
मुखपङ्कजभास्कराय नमः ।

ॐ क्षताहिताय नमः ।
ॐ क्षराय नमः ।
ॐ क्षन्त्रे नमः ।
ॐ क्षतदोषाय नमः ।
ॐ क्षमानिधये नमः ।
ॐ क्षपिताखिलसंतापाय नमः ।
ॐ क्षपानाथसमाननाय नमः ।१०००

------

## स्तोत्र ग्रन्थमाला

१. अन्नपूर्णासहस्रनामस्तोत्रम् । नामावलीसहितम्
२. गोपालसहस्रनामस्तोत्रम् । नामावलीसहितम्
३. गायत्रीसहस्रनामस्तोत्रम् । नामावलीसहितम्
४. शिवसहस्रनामस्तोत्रम् ।नामावलीसहितम्
५. आञ्जनेयसहस्रनामस्तोत्रम् । नामावलीसहितम्
६. कालिकासहस्रनामस्तोत्रम् । नामावलीसहितम्
७. सीतासहस्रनामस्तोत्रम् । नामावलीसहितम्
८. सरस्वतीसहस्रनामस्तोत्रम् । नामावलीसहितम्



९. भवानीसहस्रनामस्तोत्रम् । नामावलीसहितम्

१०. श्रीकृष्णसहस्रनामस्तोत्रम् ।नामावलीसहितम्
११. लक्ष्मीनृसिंहंसहस्रनामस्तोत्रम् ।नामावलीसहितम्
१२. बालासहस्रनामस्तोत्रम् ।नामावलीसहितम्
१३. शनैश्चरसहस्रनामस्तोत्रम् ।नामावलीसहितम्
१४. भैरवस्तोत्रम् ।(हिन्दी-आङ्ग्ल टीकोपेतम्) ।
१५. सूर्यसहस्रनामस्तोत्रम् ।नामावलीसहितम्
१६. ललितासहस्रनामस्तोत्रम् ।नामावलीसहितम्
१७. ललितात्रिशतिनामावली सहितम्
१८. विष्णुसहस्रनामस्तोत्रम् ।नामावलीसहितम्
१९. नटेशसहस्रनामस्तोत्रम् ।नामावलीसहितम्

२०. सौन्दयलहरी-आनन्दलहरी च ।

२१. वेङ्कटेशसहस्त्रनामस्तोत्रम् ।नामावलीसहितम्

२२. सुब्रह्मण्यसहस्त्रनामस्तोत्रम् ।नामावलीसहितम्

२३. शिवमहिम्नस्तोत्रम् ।नामावलीसहितम्

२४. महागणपतिसहस्त्रनामस्तोत्रम् । नामावलीसहितम्

२५. अन्नपूर्णास्तोत्रम् । कवच-अष्टोत्तरशतनामावलि सहितम्

२६. एकादशीमाहात्म्यम् ।हिन्दी टीका सहित ।

२७. हिन्दी शिवमहिम्नस्तोत्रम् ।हिन्दीपद्यानुवाद सहित ।



२८. सत्यनारायणकथा ।पूजाविधि-भाषाटीका-सहित ।

२९. ऋषिपञ्चमी-व्रत-कथा । भाषा टीका । पूजा-उद्यापनविधिसहित ।

श्रीकृष्णसहस्रनामस्तोत्रम् ।नामावलीसहितम्
लक्ष्मीनृसिंहसहस्रनामस्तोत्रम् ।नामावलीसहितम्
बालासहस्रनामस्तोत्रम् ।नामावलीसहितम्
शनैश्चरसहस्रनामस्तोत्रम् ।नामावलीसहितम्
भैरवस्तोत्रम् ।(हिन्दी-आङ्ग्ल टीकोपेतम्) ।
सूर्यसहस्रनामस्तोत्रम् ।नामावलीसहितम्
ललितासहस्रनामस्तोत्रम् ।नामावलीसहितम्
ललितात्रिशतिस्तोत्रम् ।नामावली सहितम्
विष्णुसहस्रन।मस्तोत्रम् ।नामावलीसहितम्
नटेशसहस्रनामस्तोत्रम् ।नामावलीसहितम्